"आत्मनेपदनिमित्तहीनात् धातोः परस्मैपदं स्यात्" सि॰कौ॰ आत्मनेपदनिमित्तं च "कर्त्रभिप्राये क्रियाफले" इत्युक्तं कर्तृगामिक्रियाफलत्वं तच्छून्यत्वेन परगामिक्रियाफलबोधयोग्यत्वादस्य परस्मैपदत्वसंज्ञेति बोध्यम्। एवं परस्मैभाषाऽप्यत्र।

**परा** अव्य॰ पॄ–आ। १प्रातिलोम्ये २प्राधान्ये ३धर्षणे ४आभिमुख्ये ५त्यागे ६विक्रमे ७भृशार्थे ८गतौ ९भङ्गे १०अनादरे ११तिरस्कारे १२प्रत्यावृत्तौ च मेदि॰ "परा वधगतिदर्शनविक्रमाभिमुख्यभृशाधीनमोक्षणप्रातिलोम्येषु" गणरत्नटीकोक्तार्थभेदे क्रमादुदाहृतं यथा पराहतः परागतः परादृष्टः पराक्रान्तः परावृत्तः पराजितः पराधीनः पराकृतः पराङ्मुखः"। १३वल्व्याककौद्यां "परा वागनपायिनी" इत्युक्ते १४मूलाधारस्थे शब्दभेदे "सा परा ययाऽक्षरमधिगम्यते" इति श्रुत्युक्तायां १५ब्रह्मविद्यायाञ्च स्त्री।

**पराक** पु॰ प्रायश्चित्तरूपे व्रतभेदे यथाह प्राय॰वि॰ "यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम्। पराको नाम कृच्छ्रोऽयं सर्वपापापनोदनः" मनुः। "जपहोमरतः कुर्याद्द्वादशाहमभोजनम्। पराक एष विख्यातः सर्वपापप्रणाशनः" बृहस्पतिः। "पराके पञ्च धेनवः" इत्युक्तेः पराकस्य पञ्चधेनुतुल्यत्वम्। यथाह अङ्गिराः "षड्भिर्वर्षैः कृच्छ्रचारी ब्रह्महा तु विशुध्यति। मासि मासि पराकेण त्रिभिर्वर्षैर्व्यपोहति"। अत्र षड्भिर्वर्षैः साशीतिशतप्राजापत्यानि पूर्वमुक्तानि तथा प्रतिमासे एकैकपराकेण वर्षे द्वादश पराकाः वर्षत्रये षट्त्रिंशत्पराकाः। ततश्च षट्त्रिंशत्पराकाशीत्युत्तरप्राजापत्यशतयोः प्रत्येकं ब्रह्मवधपापक्षयैककार्य्यकरत्वात् तुल्यत्वम्। षट्त्रिंशतश्च पञ्चगुणमशीत्युत्तरशतं भवतीति" प्रा॰त॰।

**पराके** अव्य॰ परा+अक-बा॰ डे। दूरे निघण्टुः।

**पराकाश** पु॰ वाचा प्रतिज्ञातस्यार्थस्य कर्मणाऽकृतस्य परीक्षायाम् शत॰ब्रा॰ १४।८।४।११ भाष्यम्। [राजनि॰।

**पराक्पुष्पी** स्त्री पराक् पुष्पं यस्याः ङीप्। अपामार्गे

**पराक्रम** पु॰ परा+क्रम–करणे घञ् न वृद्धिः। बले देहसामर्थ्ये अमरः।

**पराग** पु॰ परागच्छति परा+गम–ड। १धूलिमात्रे २पुष्परजसि माघः ६।१ ३स्नानीयद्रव्ये कुङ्कुमचूर्णादौ अमरः। ४उपरागे ५चन्दने च मेदि॰ ६स्वच्छन्दगतौ शब्दच॰।

**पराङ्ग** न॰ ६त॰। १अन्यस्याङ्गे "पराङ्गवत् स्वरे" पा॰ २श्रेष्ठाङ्गे। [१शिवे २उत्कृष्टाङ्गयुक्ते त्रि॰।

**पराङ्गद** पु॰ परमङ्गदमस्य उत्कृष्टाङ्गेन दायति दै–क वा।

**पराङ्गव** पु॰ पराङ्गम् उत्कृष्टाङ्गं जलहस्त्या वाति याति वा–क। समुद्रे त्रिका॰।

**पराङ्मुख** त्रि॰ पराक् मुखमस्य। १विमुखे २क्रियादौ प्रतीपाचारिणि स्त्रियां ङीप्। ३निवृत्तकृत्ये "कामबीजं मुखे माया शिरस्यङ्कुशमेव च। असौ पराङ्मुखः प्रोक्तो मध्ये तु बिन्दुलाञ्छितः" तन्त्रसारोक्ते ४मन्त्रभेदे पु॰

**पराच्** त्रि॰ परा–अञ्चति–क्विप्। १प्रतिलोमगामिनि २ऊर्द्ध्वगामिनि च "ये चामुष्मात् पराञ्चो लोकाः" छा॰उ॰। ३अप्रत्यक्षगम्ये परस्मात्मादौ पु॰। पुंसि सर्वनामस्थाने पराङ् पराञ्चौ इत्यादि स्त्रियां ङीप्। पराची। पराञ्चति क्विप्। ४परगामिनि बाह्यपदार्थबोधके ५प्रत्यगात्मभिन्ने च "पराञ्चि खानि व्यतृणत् स्वयम्भूः, तस्मात् पराङ् पश्यति नान्तरात्मन्। कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" कठोप॰। "पराञ्चि परागञ्चन्तीति स्रोपलक्षितानि श्रोत्रादीनीन्द्रियाणि खानीत्युच्यन्ते। तानि पराञ्च्येव शब्दादिविषयप्रकाशनाय प्रवर्त्तन्ते। यस्मादेवं स्वाभाविकानि तानि व्यतृणद्धिंसितवान् हननं कृतवानित्यर्थः। कोऽसौ स्वयम्भूर्यः परमेश्वरः स्वयमेव स्वतन्त्रो भवति सर्वदा न परतन्त्र इति। तस्मात् पराङ् प्रत्यगूपभिन्नानात्मभूतान् शब्दादीन् पश्यत्युपलभते नान्तरात्मन् नान्तरात्मानमित्यर्थः। एवं स्वभावेऽपि सति लोकस्य कश्चिन्नद्याः प्रतिस्रोतःप्रवर्त्तनमिव धीरो धीमान् विवेकी प्रत्यगात्मानं प्रत्यक् चासावात्मा चेति प्रत्यगात्मा प्रतीच्येवात्मशब्दो रूढो लोके नान्यस्मिन् व्युत्पत्तिपक्षेऽपि तत्रैवात्मशब्दो वर्त्तते "यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह। यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते" इत्यात्मशब्दव्युत्पत्तिस्मरणात्। तं प्रत्यगात्मानं स्वस्वभावमैक्षद् पश्यतीत्यर्थः छन्दसि कालानियमात्। कथं पश्यतीत्युच्यते। आवृत्तचक्षुरावृत्तं व्यावृत्तं चक्षुः श्रोत्रादिकमिन्द्रियजातमशेषविषयादस्य स आवृत्तचक्षुः स एवं संस्कृतः प्रत्यगात्मानं पश्यति। न हि बाह्यविषयालोचनपरत्वं प्रत्यगात्मेक्षणञ्चैकस्य सम्भवतीति। किमिच्छन् पुनरित्थं महता प्रयासेन स्वभावप्रवृत्तिनिरोधं कृत्वा धीरः प्रत्यगात्मानं